## परिसिस्ट २

## गीत्ता सीस्सै म्हैँ दक्खो खुद नै

१ मात्रास्पर्शास्तु कौन्तेय, शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्यास्तांस्, तितिक्षस्व भारत।। २.१४।।
२ तद्विद्धि प्रणिपातेन, परिप्रश्नेन सेवया। ४.३४।।
३ नात्यश्नतस्तु योगोऽस्ति, न चैकान्तमनश्नतः।
न चातिस्वप्नशीलस्य, जाग्रतो नैव चार्जुन।। ६.१६
४ युक्ताहारविहारस्य, युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य, योगो भवति दुःखहा।। १७।।
५ धर्माविरुद्धो भूतेषु, कामोऽस्मि भरतर्षभ।। ७.११
६ चतुर्विधा भजन्ते मां, जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।। १६।।
७ बुद्धिर्ज्ञानमसम्मोहः, क्षमा सत्यं दमः शमः।
सुखं दुःखं भवोऽभावो, भयं चाभयमेव च।। १०.४
अहिंसा समता तुष्टिस्, तपो दानं यशोऽयशः।
भवन्ति भावा भूतानां, मत्त एव पृथग्विधाः।। ५
८ अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।
आचार्योपासनं शौचं, स्थैर्यमात्मविनिग्रहः।। ७
इन्द्रियार्थेषु वैराग्यमनहंकार एव च।
जन्ममृत्युजराव्याधि, दुःखदोषानुदर्शनम्।। ८
असक्तिरनभिष्वङ्गः, पुत्रदारगृहादिषु।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु।। ९
मयि चानन्ययोगेन, भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि।। १०
अध्यात्मज्ञाननित्यत्वं, तत्त्वज्ञानार्थदर्शनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा।। ११।।
९ सत्त्वं रजस्तम इति, गुणाः प्रकृतिसंभवाः।



निबध्नन्ति महाबाहो, देहे देहिनमव्ययम्।। १४.५
१० तत्र सत्त्वं निर्मलत्वात्, प्रकाशकमनामयम्।
सुखसङ्गेन बध्नाति, ज्ञानसङ्गेन चानघ।। ६
११ रजो रागात्मकं विद्धि, तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय, कर्मसङ्गेन देहिनम्।। ७
१२ तमस्त्वज्ञानजं विद्धि, मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्, तन्निबध्नाति भारत।। ८
१३ सत्त्वं सुखे संजयति, रजः कर्मणि भारत।
ज्ञानमावृत्य तु तमः, प्रमादे संजयत्युत।। ९
१४ सर्वद्वारेषु देहेऽस्मिन्, प्रकाश उपजायते।
ज्ञानं यदा, तदा विद्याद्, विवृद्धं सत्त्वमित्युत। ११
१५ लोभः प्रवृत्तिरारम्भः, कर्मणामशमः स्पृहा।
रजस्येतानि जायन्ते, विवृद्धे भरतर्षभ।। १४.१२
१६ अप्रकाशोऽप्रवृत्तिश्च, प्रमादो मोह एव च।
तमस्येतानि जायन्ते, विवृद्धे कुरुनन्दन।। १३
१७ कर्मणः सुकृतस्याहुः, सात्त्विकं निर्मलं फलम्।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम्।। १६
१८ सत्त्वात्संजायते ज्ञानं, रजसो लोभ एव च।
प्रमादमोहौ तमसो, भवतोऽज्ञानमेव च।। १७
१९ प्रकाशं च प्रवृत्तिं, च मोहमेव च पाण्डव।
न द्वेष्टि संप्रवृत्तानि, न निवृत्तानि काङ्क्षति।। २२
उदासीनवदासीनो, गुणैर्यो न विचाल्यते।
गुणा वर्तन्त इत्येव, योऽवतिष्ठति नेङ्गते।। २३
समदुःखसुखः स्वस्थः, समलोष्टाश्मकाञ्चनः।
तुल्यप्रियाप्रियो धीरस्, तुल्यनिन्दाऽऽत्मसंस्तुतिः।। २४
मानापमानयोस्तुल्यस्, तुल्यो मित्रारिपक्षयोः।
सर्वारम्भपरित्यागी, गुणातीतः स उच्यते।। २५

२० मां च योऽव्यभिचारेण, भक्तियोगेन सेवते।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते।। २६।।
२१ अभयं सत्त्वसंशुद्धिर् ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च, स्वाध्यायस्तप आर्जवम्।। १६.१
अहिंसा सत्यमक्रोधस्, त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्।। २
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति संपदं दैवीमभिजातस्य भारत।। ३
२२ दम्भो दर्पोऽभिमानश्च, क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य, पार्थ संपदमासुरीम्।। ४
२३ दैवी संपद्विमोक्षाय, निबन्धायासुरी मता।। १६.५
२४ प्रवृत्तिं च निवृत्तिं च, जना न विदुरासुराः।
न शौचं नापि चाचारो, न सत्यं तेषु विद्यते।। ७
असत्यमप्रतिष्ठं ते, जगदाहुरनीश्वरम्।
अपरस्परसंभूतं, किमन्यत् कामहैतुकम्।। ८
काममाश्रित्य दुष्पूरं, दम्भमानमदान्विताः।
मोहाद् गृहीत्वाऽसद्ग्राहान्, प्रवर्तन्तेऽशुचिव्रताः।। १०
अहंकारं बलं दर्पं, कामं क्रोधं च संश्रिताः। १८
आसुरीं योनिमापन्ना, मूढा जन्मनि जन्मनि।
मामप्राप्यैव कौन्तेय, ततो यान्त्यधमां गतिम्।। २०
२५ त्रिविधं नरकस्येदं, द्वारं नाशनमात्मनः।
कामः कोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।। २१
२६ यः शास्त्रविधिमुत्सृज्य, वर्तते कामकारतः।
न स सिद्धिमवाप्नोति, न सुखं न परां गतिम्।। २३
२७ तस्माच्छास्त्रं प्रमाणं ते, कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं, कर्म कर्तुमिहार्हसि।। २४।।
२८ सत्त्वानुरूपा सर्वस्य, श्रद्धा भवति भारत।



श्रद्धामयोऽयं पुरुषो, यो यच्छ्रद्धः स एव सः।। १७.३
२९ यजन्ते सात्त्विका देवान्, यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये, यजन्ते तामसा जनाः।। ४
३० अशास्त्रविहितं घोरं, तप्यन्ते ये तपो जनाः।
दम्भाहंकारसंयुक्ताः, कामरागबलान्विताः।। ५
कर्शयन्तः शरीरस्थं, भूतग्राममचेतसः।
मां चैवान्तःशरीरस्थं, तान् विद्ध्यासुरनिश्चयान्।। ६
३१ आयुः सत्त्वबलारोग्य-सुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या, आहाराः सात्त्विकप्रियाः।। ८
३२ कट्वम्ललवणात्युष्ण-तीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टा, दुःखशोकामयप्रदाः।। ९
३३ यातयामं गतरसं पूति पर्युषितं च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्।। १०
३४ अफलाकाङ्क्षिभिर्यज्ञो, विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः, समाधाय स सात्त्विकः।। ११
३५ अभिसंधाय तु फलं, दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ, तं यज्ञं विद्धि राजसम्।। १२
३६ विधिहीनमसृष्टान्नं, मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं, तामसं परिचक्षते।। १३
३७ देवद्विजगुरुप्राज्ञ-पूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च, शारीरं तप उच्यते।। १४
३८ अनुद्वेगकरं वाक्यं, सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव, वाङ्मयं तप उच्यते।। १५
३९ मनःप्रसादः सौम्यत्वं, मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्, तपो मानसमुच्यते।। १६
४० श्रद्धया परया तप्तं, तपस्तत् त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः, सात्त्विकं परिचक्षते।। १७

४१ सत्कारमानपूजार्थं, तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं, राजसं चलमध्रुवम्।। १८
४२ मूढग्राहेणात्मनो यत्, पीडया क्रियते तपः।
परस्योत्सादनार्थं वा, तत् तामसमुदाहृतम्।। १९
४३ दातव्यमिति यद्दानं, दीयतेऽनुपकारिणे।
देशे काले च पात्रे च, तद्दानं सात्त्विकं स्मृतम्।। २०
४४ यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्।। २१
४५ अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।
असत्कृतमवज्ञातं, तत् तामसमुदाहृतम्।। १७.२२
४६ अश्रद्धया हुतं दत्तं, तपस्तप्तं कृतं च यत्।
असदित्युच्यते पार्थ, न च तत् प्रेत्य नो इह।। २८।।
४७ काम्यानां कर्मणां न्यासं, सन्न्यासं कवयो विदुः।
४८ सर्वकर्मफलत्यागं, प्राहुस्त्यागं विचक्षणाः।। १८.२
४९ यज्ञदानतपःकर्म, न त्याज्यं कार्यमेव तत्।। ५
५० नियतस्य तु संन्यासः, कर्मणो नोपपद्यते।
मोहात् तस्य परित्यागस्, तामसः परिकीर्तितः।। ७
५१ दुःखमित्येव यत् कर्म, कायक्लेशभयात् त्यजेत्।
स कृत्वा राजसं त्यागं, नैव त्यागफलं लभेत्।। ८
५२ कार्यमित्येव यत्कर्म, नियतं क्रियतेऽर्जुन।
सङ्गं त्यक्त्वा फलं चैव, स त्यागः सात्त्विको मतः।। ९
५३ न हि देहभृता शक्यं, त्यक्तुं कर्माण्यशेषतः।
यस्तु कर्मफलत्यागी, स त्यागीत्यभिधीयते।। ११
५४ अनिष्टमिष्टं मिश्रं च, त्रिविधं कर्मणः फलम्।। १२
५५ पञ्चैतानि महाबाहो, कारणानि निबोध मे।। १३
अधिष्ठानं तथा कर्ता, करणं च पृथग्विधम्।
विविधाश्च पृथक् चेष्टा, दैवं चैवात्र पञ्चमम्।। १४



५६ यस्य नाहंकृतो भावो, बुद्धिर्यस्य न लिप्यते।
हत्वापि स इमांल्लोकान्, न हन्ति न निबध्यते।। १७
५७ ज्ञानं कर्म च कर्ता च, त्रिधैव गुणभेदतः।। १९
५८ सर्वभूतेषु येनैकं, भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु, तज्ज्ञानं विद्धि सात्त्विकम्।। २०
५९ पृथक्त्वेन तु यज्ज्ञानं, नानाभावान् पृथग्विधान्।
वेत्ति सर्वेषु भूतेषु, तज्ज्ञानं विद्धि राजसम्।। २१
६० यत्तु कृत्स्नवदेकस्मिन्, कार्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पं च, तत् तामसमुदाहृतम्।। १८.२२
६१ नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म, यत् तत् सात्त्विकमुच्यते।। २३
६२ यत्तु कामेप्सुना कर्म, साहङ्कारेण वा पुनः।
क्रियते बहुलायासं, तद्राजसमुदाहृतम्।। २४
६३ अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म, यत् तत् तामसमुच्यते।। २५
६४ मुक्तसङ्गोऽनहंवादी, धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्विकारः, कर्ता सात्त्विक उच्यते।। २६
६५ रागी कर्मफलप्रेप्सुर्, लुब्धो हिंसात्मकोऽशुचिः।
हर्षशोकान्वितः कर्ता, राजसः परिकीर्तितः।। २७
६६ अयुक्तः प्राकृतः स्तब्धः, शठो नैष्कृतिकोऽलसः।
विषादी दीर्घसूत्री च, कर्ता तामस उच्यते।। २८
६७ प्रवृत्तिं च निवृत्तिं च, कार्याकार्ये भयाभये।
बन्धं मोक्षं च या वेत्ति, बुद्धिः सा पार्थ सात्त्विकी।। ३०
६८ यया धर्ममधर्मं च, कार्यं चाकार्यमेव च।
अयथावत्प्रजानाति, बुद्धिः सा पार्थ राजसी।। ३१
६९ अधर्मं धर्ममिति या, मन्यते तमसावृता।
सर्वार्थान् विपरीतांश्च, बुद्धिः सा पार्थ तामसी।। ३२

७० धृत्या यया धारयते, मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या, धृतिः सा पार्थ सात्त्विकी।। ३३
७१ यया तु धर्मकामार्थान्, धृत्या धारयतेऽर्जुन।
प्रसङ्गेन फलाकाङ्क्षी, धृतिः सा पार्थ राजसी।। ३४
७२ यया स्वप्नं भयं शोकं, विषादं मदमेव च।
न विमुञ्चति दुर्मेधा, धृतिः सा पार्थ तामसी।। ३५
७३ अभ्यासाद्रमते यत्र, दुःखान्तं च निगच्छति।। १८.३६
७४ यत्तदग्रे विषमिव, परिणामेऽमृतोपमम्।
तत् सुखं सात्त्विकं, प्रोक्तमात्मबुद्धिप्रसादजम्।। ३७
७५ विषयेन्द्रियसंयोगाद्, यत् तदग्रेऽमृतोपमम्।
परिणामे विषमिव, तत्सुखं राजसं स्मृतम्।। ३८
७६ यदग्रे चानुबन्धे च, सुखं मोहनमात्मनः।
निद्राऽऽलस्यप्रमादोत्थं, तत्तामसमुदाहृतम्।। ३९
७७ न तदस्ति पृथिव्यां वा, दिवि देवेषु वा पुनः।
सत्त्वं प्रकृतिजैर्मुक्तं, यदेभिः स्यात् त्रिभिर्गुणैः।। ४०
७८ शमो दमस्तपः शौचं, क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं, ब्रह्मकर्म स्वभावजम्।। ४२
७९ शौर्यं तेजो धृतिर्दाक्ष्यं, युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च, क्षात्रं कर्म स्वभावजम्।। ४३
८० कृषिगौरक्ष्यवाणिज्यं, वैश्यकर्म स्वभावजम्।
८१ परिचर्यात्मकं कर्म, शूद्रस्यापि स्वभावजम्।। ४४
८२ स्वे स्वे कर्मण्यभिरतः, संसिद्धिं लभते नरः।। ४५
८३ यतः प्रवृत्तिर्भूतानां, येन सर्वमिदं ततम्।
८४ स्वकर्मणा तमभ्यर्च्य, सिद्धिं विन्दति मानवः।। ४६
८५ श्रेयान् स्वधर्मो विगुणः, परधर्मात् स्वनुष्ठितात्।
स्वभावनियतं कर्म, कुर्वन् नाप्नोति किल्बिषम्।। ४७।।